दिनाङ्क :- 10.04.2026

प्रात: - 06:55

<u>विधानसभा निर्वाचन</u>

असम-केरल-पुद्दुचेरी इत्येतेषु नगरेषु विधानसभानिर्वाचनानि समेत्य त्रिराज्याणां चतुर्षु विधानसभा-क्षेत्रेषु उपनिर्वाचनाय मतदानं ह्य: शान्तिपूर्णम् आसीत्। निर्वाचनायोगानुसारेण असमराज्ये त्रि अष्ट दशांशोत्तर पंचाशीति प्रतिशतं यावत् मतदानं जातम्, यत् तत्रत्य विधानसभा-निर्वाचनस्य इतिहासे सर्वाधिकम् आसीत् । केरलराज्ये शून्यं त्रि दशांशोत्तर अष्टसप्तति प्रतिशतं यावत् मतदानं जातम्। कर्नाटकस्य बागलकोट -आसने जाते उपनिर्वाचने सप्त शून्यं दशांशोत्तर अष्टषष्टि- प्रतिशंत मतदानं जातम्, तत्रैव दक्षिण-दावनगेरे इत्यत्र पञ्च दशांशोत्तर-अष्टषष्टि- प्रतिशतं मतदानं जातम्। नागालैंड राज्यस्य कोरिडाङ्ग इत्यत्र द्वि एकं दशांशोत्तर द्व्यशीति प्रतिशतं, त्रिपुराराज्यस्य धर्मनगर इत्यत्र अशीति प्रतिशताधिकं मतदानम् अभवत्। मुख्यनिर्वाचनायुक्त: ज्ञानेश-कुमार: निर्वाचनायुक्तेन डॉ. एस.एस.संधू इत्येतेन डॉ. विवेक जोशी इत्यनेन च सह मतदानप्रक्रियाया: निरीक्षणं कृतवान्।

<u>पीएम परिवर्तन संकल्प</u>

भाजपादलस्य वरिष्ठनेता प्रधानमन्त्री च नरेन्द्रमोदी ह्य: हल्दिया- आसनसोल-सूरी इत्येतेषु स्थलेषु परिवर्तनसङ्कल्प-सभां सम्बोधयन् पश्चिमबङ्गाले प्रचलितं निर्वाचनं राज्यस्य पूर्ववैभवस्य पुन:स्थापनस्य अभियानं वर्तते इति। तमिलनाडु इत्यत्र मुख्यप्रचारकै: सह निर्वाचनाभियानं द्रुतगत्या प्रचलति। भाजपादलस्य वरिष्ठनेता केन्द्रीयमन्त्री च पीयूषगोयल: डॉ. एल् मुरुगन, पूर्वनेता अन्नामलाई च राष्ट्रियजनतान्त्रिक-संयुत्यै मतदातृन् आक्रष्टुं संलग्नानि सन्ति।

<u>जयशङ्कर</u>

विदेशमन्त्रिणा डॉ. एस् जयशङ्करेण कथिंत यत् भारत-मॉरीशस् -देशयो: मध्ये सहमतौ गतवर्षे महत्वपूर्णा प्रगति: जाता। पोर्ट लुइस इत्यत्र मॉरीशस देशस्य प्रधामन्त्रिणा नवीन-रामगुलाम इत्यनेन सह मेलनानन्तरं वार्ताहरान् संसूचयन् डॉ. जयशङ्कर: अवोचत् यत् सामुद्रिक-सहयोगं, विकाससहमतिं, स्वास्थ्यं, शिक्षां, क्षमतानिर्माणं जनानां मध्ये सम्बन्धान् च समेत्य नैकेषु क्षेत्रेषु चर्चा जाता।

असौ मॉरीशसदेशस्य विकास-प्राथमिकतानुरूपं भारतस्य निरन्तरसमर्थनं पुनरुक्तवान्। डॉ. जयशङ्कर: नवम- हिन्द-महासागरसम्मेलने भागग्रहणार्थं ह्य: मॉरीशसदेशं सम्प्राप्तवान्।

विदेशसचिव

विदेशसचिव: विक्रममिसरी इत्यसौ स्वीय वाशिङ्गटन- यात्रावधौ अमेरिकादेशस्य विदेशमन्त्रिणा मार्को रुबियो इत्येतेन सह उपवेशनं कृतवान्। उपवेशनं व्हाइट हाउस इत्यत्र जातम् तथा प्रमुख क्षेत्रेषु द्विपाक्षिकसहयोगं सुदृढीकर्तुं चर्चा जाता। असौ उक्तवान् यत् अग्रिमे मासे सचिव: रुबियो भारतम् आगमिष्यति इति सम्भाव्यते। इत: प्राक् श्री मिसरी अमेरिकादेशस्य राजनीतिकप्रकरणानां मन्त्रिणा एलिसन हूकर इत्येतेन सह मेलनं कृतवान्।

आईपीएल

आईपीएल इति क्रिकेट प्रतिस्पर्धायां, कोलकाताया: ईडन गार्डन्स् इत्यत्र ह्य: रात्रौ लखनऊ सुपर जायण्ट्स् दलेन कोलकाता नाइट राइडर्स दलं त्रिस्तोभै: पराजितम्। अद्य गुवाहाट्या: ए.सी.ए क्रीडाङ्गणे राजस्थान-रॉयलस् दलं रॉयल चैलेन्जर्स बैंङ्ग्लुरू दलं सम्मुखीकरिष्यति। इयं स्पर्धा सायं सार्धसप्तवादने प्रारप्स्यते।

।। इति वार्ता:।।